National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 286-290
© 2026 NJHSR
www.sanskritarticle.com

**प्रो.सुजातात्रिपाठी**
आचार्या, व्याकरणविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयःक़ुतब-इंस्टीट्यूशनल-एरिया , नवदेहली – 16

**Correspondence:**
**प्रो.सुजातात्रिपाठी**
आचार्या, व्याकरणविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयःक़ुतब-इंस्टीट्यूशनल-एरिया , नवदेहली – 16

# व्याकरणशास्त्रे मनुस्मृतौ च दण्डविधानम्

**प्रो.सुजातात्रिपाठी**

**दण्डशब्दस्य परिचयः**

दण्डशब्दस्य प्रयोगः विविधेषु अर्थेषु वर्तते। निरुक्तकारो यास्कः दण्डशब्दस्य निष्पत्तिः दद्-धातोरिति मन्यते। अस्यार्थश्च धारणमिति भवति। यथोक्तं तेन - **दण्डो ददतेर्धास्यतिकर्मणः, धार्यते ह्येषोऽपराधेषु, दमनादित्यौपमन्यवः**[1]। यद् धार्यते स एव दण्डशब्देनाभिधीयते। वस्तुतः दण्डशब्दस्य द्विविधोऽर्थः भवितुमर्हति। तत्र अस्माभिः स्वरक्षायै यस्य धारणं क्रियते अथवा ब्रह्मचारिसन्यासिभिः धार्मिकविधानानुसारेण यद् धार्यते सः 'दण्डा' इति प्रथमोऽर्थः। द्वितीयस्तु अपराधिभ्यो यः दण्डः दीयते सोऽर्थः - **धार्यते ह्येषोऽपराधेषु**। अत्र यास्काचार्यः अपराधिभ्यः प्रदीयमानेऽर्थे दण्डशब्दस्य निष्पत्तिं दद्-धातोरिति न स्वीकरोति, अतस्तेन औपमन्यवस्य मतमुद्धृत्य दम्-धातोः दण्डशब्दस्य निष्पत्तिरिति प्रतिपादिता। अर्थात् येन अपराधकर्तॄणां दमनं क्रियते स एव दण्ड इति। अतः अस्य निष्पत्तिः दम्-धातोरपि समीचीनैव। शब्दकल्पद्रुमे च 'दम्' 'दण्ड्' इति उभाभ्यामपि धातुभ्यां दण्डशब्दस्य निष्पत्तिः प्रदर्शिता।

'**दण्डयति अनेन सः दण्डः**' इत्यर्थे दण्डधातोः करणेऽर्थे घञि प्रत्यये दण्डशब्दो निष्पद्यते। तथैव '**दाम्यति अनेन सः दण्डः**' अर्थात् येन माध्यमेन दुष्टजनानां दमनं क्रियते इत्यर्थे दम्-धातोः निपातनात् औणादिके डप्रत्यये[2] दण्डशब्दोऽयं निष्पद्यते।


महाभारते शान्तिपर्वणि दण्डविषये अर्जुनः कथयति –

**असम्मोहाय मर्त्यानामर्थसंरक्षणाय च।**
**मर्यादा स्थापिता लोके दण्डसंज्ञा विशाम्यते।।**[3]

अर्थात् प्रमादादिभ्यो मनुष्याणां संरक्षणाय, अर्थस्य रक्षणाय च स्थापिता मर्यादा नियमविशेषो वा दण्डः इति कथ्यते।

**यस्माददान्तान् दमयत्यशिष्टान् दण्डयत्यपि।**
**दमनात् दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः।।**[4]

अर्थात् येन उद्दण्डपुरुषाणां दमनम्, अशिष्टजनानां दण्डनं च क्रियते स एव दण्ड इति कथ्यते।




**व्याकरणशास्त्रे दण्डविधानव्यवस्था**

महर्षिपतञ्जलिसमये अपराधानां भेदाः तेषां कृते दण्डस्य व्यवस्था च भिन्नभिन्ना आसीत्। तदानीमापराधिककार्ये संलग्नेभ्यः राजदण्डः दीयते स्म।

स्तैन्यम्, दस्युकार्यम्, हत्या इत्यादयः प्रमुखाः अपराधाः, तेषामपि पृथक् पृथक् भेदाः भवन्ति। अपराधभेदे तस्य कृते दण्डोऽपि भिन्न आसीत्। एतद्विषये भाष्ये बहूनि उदाहरणानि प्राप्यन्ते। काशिकायामपि उल्लिखितं वर्तते यत् "गर्गाः शतं दण्ड्यताम्, अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति"[5] इत्यादि। आर्थिकदण्डः वैयक्तिकरूपेण सामूहिकरूपेण वा आसीत्। वैयक्तिकदण्डः व्यक्तिविशेषाय सामूहिकश्च कुटुम्बाय अपराधिसमूहाय वा दीयते। राजानोऽपि चौरकार्ये संलग्लाश्चेत्तेषां कृतेऽपि दण्डस्य व्यवस्था आसीत्। तदेवोक्तं 'अर्थिनश्च राजानो हिरण्येन' इत्यादिना। तथैव शारीरिकदण्डोऽपि बहुविधः वर्णितः। तेषु च सामान्यतया ताडनम्, क्रोडप्रहारः, मूसलादिभिः ताडनम्, अङ्गच्छेदनम्, भोजने विषमिश्रणम्, शूलारोहणमित्यादिविविधप्रकारैः तत्तदपराधानां तदनुकूलाः दण्डाः दीयन्ते। काशिकायां द्विपादकार्षापणस्य द्विशतकार्षापणस्य च दण्डविधानस्योल्लेखो प्राप्यते[6]।

एवञ्च व्याकरणे दण्डविधानस्य विषये बहवः प्रयोगाः प्राप्यन्ते। कौमुद्यां "गर्गान् शतं दण्डयति" इति प्रयोगे कस्यचिदपराधस्य दण्डरूपेण गर्गेभ्यः शतरूप्यकात्मकं दण्डं ददातीति उदाहरणं वर्तते। महाभाष्ये च 'वृद्धिरादैच्' इति सूत्रव्याख्यावासरे "एवं हि दृश्यते लोके यः उदात्ते कर्त्तव्येऽनुदात्तं करोति खण्डिकोपाध्यायः तस्मै चपेटिकां ददाति, अन्यत्वं करोषि" इत्यत्र छात्रेण वर्णानामशुद्धे उच्चारिते आचार्यः तस्मै दण्डरूपेण चपेटिकां ददातीति वर्णनं प्राप्यते। एवमेव अन्यत्रापि बहुत्र कस्मिन्नपराधे को दण्डः देय इति बहुधा व्याख्यातमस्ति। दण्डशब्दप्रयुक्तानि सूत्राण्यपि यथा – 'दण्डादिभ्यश्च' 'दण्डव्यवसर्गयोश्च' 'द्विदण्ड्यादिभ्यश्च' इत्यादीनि। 'दण्डव्यवसर्गयोश्च' इति सूत्रस्य व्याख्यावसरे काशिकाकारेण यष्टिभिन्नार्थे दण्डशब्दस्य दमनमित्यर्थः प्रतिपादितः। "दण्डशब्दोऽत्र दमने वर्तमानस्य ग्रहणं युक्तम्, दमनस्यैव प्रत्ययान्तेन गम्यमानत्वात्"[7] इत्यादि। एवञ्च यद्यपि तत्र कस्यापराधस्य कृते को दण्डो देय इति स्पष्टतयोल्लेखो नास्ति परं दण्डविधानव्यवस्थाविषये व्याकरणशास्त्रे तत्तद्व्याख्याग्रन्थेषु च प्राचुर्येण प्रयोगाः प्राप्यन्ते।

**मनुस्मृतौ प्रतिपादितविषयाः**

मनुस्मृतिः अस्माकं सनातनपरम्परायाः अत्यन्तं महत्त्वपूर्णः एकः प्राचीनग्रन्थः अस्ति। अस्य ग्रन्थस्य रचयिता आचार्यो मनुः वर्तते। अयं ग्रन्थः धर्मशास्त्रं, मानवशास्त्रमित्यादिनाम्नापि प्रसिद्धोऽस्ति। धर्मस्य उपदेशकत्वादेव अस्य ग्रन्थस्य नाम धर्मशास्त्रमिति वर्तते। **'धर्मो रक्षति रक्षितः'** **'धर्मेण हीनाः पशुभिः समानाः'** इत्यादिभिः वचनैः धर्म एव मनुष्येषु मनुष्यत्वमादधाति। धर्मो नाम तादृशं बीजमस्ति येन मानवान् तेषां कर्त्तव्याकर्त्तव्यविषयान् शिक्षयति। ग्रन्थश्चायं मनुष्याणां धर्मः कः, कथं धर्मस्य पालनं करणीयमित्यादि-विविधविषयाणां ज्ञानं प्रदाय सदसद्विवेकिनीं बुद्धिं विकासयति। अत्र ग्रन्थे द्वादश अध्यायाः वर्तन्ते। तत्र प्रत्यध्यायं प्रतिपादिताः विषयाः अधोलिखिताः सन्ति –

**प्रथमाध्यायः** – सृष्टेः उत्पत्तिः, ब्रह्माण्डविज्ञानम् इत्यादिवर्णनम्।

**द्वितीयाध्यायः** – धर्मः, कर्त्तव्यम्, संस्कारः इत्यादिवर्णनम्।

**तृतीयाध्यायः** – ब्रह्मचर्याश्रमस्य गृहस्थाश्रमस्य च प्रक्रियायाः वर्णनम्।

**चतुर्थाध्यायः** – भोजनादिनियमः, गृहस्थाश्रमस्य नियमाः इत्यादिवर्णनम्।

**पञ्चमाध्यायः** – वानप्रस्थाश्रमस्य सन्यासाश्रमस्य च प्रक्रियायाः वर्णनम्।

**षष्ठाध्यायः** – राजधर्मस्य राज्ञः कर्त्तव्यस्य च वर्णनम्।

**सप्तमाध्यायः** – राष्ट्रस्य नीतेः नियमानाञ्च वर्णनम्।

**अष्टमाध्यायः** – स्त्रीपुरुषाणां विविधवर्गस्य मनुष्याणाञ्च दैनिककर्त्तव्यस्य सामाजिकनियमानाञ्च वर्णनम्।

**नवमाध्यायः** – समाजस्य विविधवर्गाणां नियमाः, आपत्काले पालनीयनियमानाञ्च वर्णनम्।

**दशमाध्यायः** – सामाजिकवर्गीकरणम्, दानस्य प्रायश्चित्तस्य च नियमाः,

विवाहप्रकाराणाञ्च वर्णनम्।

**एकादशाध्यायः** – विविधपापानां निवारणार्थं प्रायश्चित्तविधेः वर्णनम्।

**द्वादशाध्यायः** – कर्मफलानां मोक्षधर्मस्य च वर्णनम्।

ग्रन्थेऽस्मिन् व्यावहारिकोपयोगिनां विविधविषयाणां वर्णनं प्राप्यते। तत्र अस्य ब्रह्माण्डस्य उत्पत्तिः कथं जाता, कर्मस्य कः सिद्धान्तः तेषां गुणदोषाणां वर्णनम्, समाजे प्रयुक्तानां विविधजातिव्यवस्थानां वर्णनं तेषामधिकाराणां वर्णनं तेषामुपयोगिता च, एवमेव राजधर्मस्य परिचयः प्रजानां सुरक्षा, निष्पक्षः न्यायः इत्यादिविषयेषु राज्ञां कर्त्तव्यम्, स्त्रीणां सम्मानाय तासामधिकारस्य वर्णनम्, अपराधानां प्रकाराः तथा अपराधे सति समुचितदण्डस्य व्यवस्था इत्यादिविषयाः अत्र वर्णिताः सन्ति।

**मनुस्मृतौ दण्डविधानव्यवस्था**

दण्डविषये मनुस्मृतौ उक्तमस्तियत् –

**दण्डः शास्ति प्रजाः सर्वाः दण्ड एवाभिरक्षति।**

**दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।।**[8]

अर्थात् दण्ड एव प्रजासु शासनं करोति, दण्ड एव सर्वान् रक्षति, सर्वेषु सुप्तेषु च दण्ड एव जागर्ति अतः विद्वांसः दण्डमेव धर्मं कथयन्ति। सैव दण्डस्य व्यवस्था यत्र शास्त्रे प्रतिपादितास्ति तच्छास्त्रं दण्डनीतिशास्त्रमिति कथ्यते, दण्डव्यवस्था च दण्डनीतिरिरिति कथ्यते। महाभारतस्य शान्तिपर्वणि स्वधर्मात् स्वकर्त्तव्याच्च वैमुख्यमेव दण्डस्य दण्डनीतेश्च कारणमिति कथितं वर्तते। वैदिककाले मनुष्याः प्रकृत्यैव स्वधर्मणि प्रवृत्ताः आसन् अतस्तदा दण्डव्यवस्थायाः आवश्यकता नासीत्, परन्तु कालान्तरे शनैः शनैः मनुष्येषु धर्मस्य भावनायाः

ह्रासः, स्वकर्त्तव्याकर्त्तव्येषु अज्ञानता, अभीष्टवस्तूनां सद्य एव प्राप्तेरिच्छा, काम-क्रोध-लोभ-मोहादीनाम् आधिक्यमवर्धत। तेन वैदिकधर्मस्य ह्रासो जातः, तेन दण्डस्य आवश्यकतापि अनुभूता।

**दण्डस्य प्रकाराः**

प्राचीनभारतीयसभ्यतायां विविधप्रकाराणां दण्डविधानानामुल्लेखः प्राप्यते। तत्रापि मुख्यतया चतुर्विधानां दण्डानामुल्लेखः प्राप्यते। ते च वाग्दण्डः, धिग्दण्डः, अर्थदण्डः, मृत्युदण्डश्च इति सन्ति। मनोरनुसारं मनुष्याणां प्राथमिकापराधे वाग्दण्डः, द्वितीयापराधे धिग्दण्डः, तृतीयापराधे अर्थदण्डः, ततः परमपि अपराधे सति मृत्युदण्डस्य विधानं वर्तते। यथोक्तं मनुस्मृतौ –

**वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम्।**
**तृतीयं धनदण्डं तु वधदण्डमतः परम्।।**[9]

**वाग्दण्डो धिग्दण्डश्च**

प्राचीनभारतीयव्यवस्थायां कठोरदण्डविधानेन सह सामान्यापराधानां कृतेऽपि दण्डस्य विधानं द्रष्टुं शक्यते। यथा - यदा प्रथमो द्वितीयो वा अपराधो भवति, अथवा अपराधिनः वयः अल्पं वर्तते अथवा अपराधकर्ता यदि उच्चजातेः सम्बद्धः समाजे प्रतिष्ठितश्च अस्ति चेत्तस्य कृते वाग्दण्डस्य धिग्दण्डस्य वा विधानं वर्तते। वचनमाध्यमेन दीयमानो दण्डः वाग्दण्डः, अपमानतिरस्कारादिमाध्यमेन दीयमानो दण्डश्च धिग्दण्डः कथ्यते। एतद् दण्डद्वयं समाजे प्रायः उच्चवर्गस्य मनुष्याणां कृते आसीत्, निम्नवर्गाणां कृते अस्योल्लेखः न प्राप्यते।

यदि कश्चन साद्गुण्ययुक्तो मनुष्यः प्रथमं सामान्यापराधं करोति तस्मै “त्वया अनुचितं कार्यं कृतम्, अतः परम् एतादृशमनुचितं कार्यं न कर्त्तव्यम्, सावधानेन भवितव्यम्” इत्यादिवचनादिना वाग्दण्डः दीयते स्म। एतादृशो दण्डः तादृशेभ्यो मनुष्येभ्यः दीयते स्म ये समाजे लब्धप्रतिष्ठाः, वेदज्ञाः, उच्चवर्गीयाः वा आसन् तथा मानसिकवेदनादिवशात् प्रमादवशाद्वा अनुचितं कार्यं कुर्वन्ति। एतादृशाः मनुष्याः दण्डप्राप्त्यनन्तरमात्मग्लानिमनुभूय ततः परमपराधकर्मणः विरताः भवन्ति। यदि दण्डप्राप्त्यनन्तरमपि पुनः आपराधिककार्यं कुर्वन्ति चेत्तेषां कृते धिग्दण्डस्य विधानं भवति।

धिग्दण्डः वाग्दण्डात् किञ्चिद्भिन्नो वर्तते। अत्र न केवलं सामान्यवचनैः अपितु “त्वया अत्यन्तमनुचितं कार्यं कृतम्, धिक् त्वम्, मनुष्यरूपे त्वं पशुवत् असि” इत्यादिकठोरवचनमाध्यमेन अपराधिनां निन्दा क्रियते। अनेन तिरस्कारवचनेन अपराधिनां मनसि आत्मलज्जायाः भावना जागर्ति, येन पुनः सः अपराधकर्मणि प्रवृत्तो न भवति।

एवम्प्रकारेण वाग्दण्डः धिग्दण्डश्च मनुष्याणाम् अनुचितमार्गात् उचितमार्गे आनयनाय एकं साधनमस्ति। अत्र शारीरिकवेदना न दीयते अपितु मानसिकपीडा सामाजिकावमानना वा प्रदीयते।

**अर्थदण्डः**

मनुना प्रोक्तेषु दण्डेषु अर्थदण्डः अन्यतमं प्रमुखं स्थानं भजते। यथोक्तं मनुना –

**उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्।**
**चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च।।**[10]

अत्र अपराधिभ्यः तेषामपराधानुसारेण धनं गृहीत्वा दण्डः दीयते, स च दण्डः अर्थदण्डः कथ्यते। कस्मिन् अपराधे सति कियान् अर्थदण्डः देयः इति विषये अर्थदण्डस्य त्रयः प्रकाराः प्रतिपादिताः सन्ति – प्रथमसाहसः, मध्यमसाहसः, उत्तमसाहसश्च। उक्तञ्च यथा –

**पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः।**
**मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः।।**[11]

**प्रथमः साहसः** – पञ्चाशदुत्तरद्विशतं (२५०) पणाः।
**मध्यमः साहसः** – पञ्चशतं (५००) पणाः।
**उतमः साहसः** – सहस्रं (१०००) पणाः।

**मृत्युदण्डः**

प्राचीनभारतीयदण्डव्यवस्थायां मृत्युदण्डः चरमो दण्डः वर्तते। अस्योपयोगः तदैव क्रियते यदा अन्येभ्यो दण्डेभ्यः अपराधी प्रभावितो न भवति तथा च वारं वारं आपराधिककर्मणि प्रवृत्तो भवति। सर्वप्रथमन्तु अपराधिभ्यः इतः पूर्वोक्ताः दण्डाः एव प्रदीयन्ते परं यदा अपराधः असाधारणः भवति यदा च अन्ये दण्डाः प्रभाविताः न भवन्ति तदैव अन्तिमदण्डरूपेण मृत्युदण्डः दीयते।

एतादृशः अपराधः मुख्यतया द्विविधो वर्तते –

१. **राज्यविरुद्धः क्रियमाणः अपराधः** (यथा - राजद्रोहः, महाभियोगः इत्यादयः)
२. **महापापम्** (यथा - धार्मिकव्यवस्थायाः सामाजिकव्यवस्थायाः विरुद्धञ्च जायमानम् अत्यन्तमसाधारणं पापम्, यथा - ब्रह्महत्या, गुरुहत्या, मातापितृहत्या इत्यादयः)

मनोरनुसारं यो मनुष्यः छलपूर्वकं राजाज्ञां लिखति, राजपरिवारान् राजपुरुषान् वा परस्परं दूषयति, स्त्री-बाल-ब्राह्मणादीनां वधं करोति, छलपूर्वकं शत्रुसेवां करोति सः मृत्युदण्डभाग् भवति। उक्तञ्च –

**कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान्।**
**स्त्रीबालब्राह्मणघ्नानां हन्याद् द्विट्सेविनस्तथा।।**[12]

एवमेव यो मनुष्यः रात्रौ सन्धिच्छेदं कृत्वा परधनं चोरयति तस्य चौरस्य हस्तद्वयं छित्त्वा तं तीक्ष्णे शूले राजा आरोपयेत् इत्यादिना तादृशचौरस्य कृतेऽपि मृत्युदण्डस्य विधानं वर्तते। उक्तञ्च –

**सन्धिं छित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः।**
**तेषां छित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयत्।।**[13]

तथैव यो मनुष्यः राज्यस्य अन्नागारम्, शस्त्रागारम्, देवालयं विभेदयति तथा राज्यस्य अश्वं, गजं, रथादीन् च चोरयति तादृशचौराय राजा निःसन्देहं शीघ्रमेव मृत्युदण्डं दद्यात् इति मनुना उक्तं वर्तते। यथा –

**कोष्ठागारायुधागारदेवतागारभेदकान्।**
**हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन्।।**[14]

**अपराधः दण्डश्च**

धर्मशास्त्रेषु अपराधस्य वर्णनं मूलरूपेण वाक्पारुष्यम्, स्तेयः, साहसम्, इत्यादिशीर्षकमाध्यमेन प्रदर्शितं वर्तते।

**वाक्पारुष्यं –** अन्यान् जनान् प्रति कटुवचनस्य प्रयोगः अथवा अन्येषां निन्दा इत्यादि वाक्पारुष्यमस्ति। धर्मशास्त्रानुसारेण वाक्पारुष्यस्य दण्डः वर्णानुसारेण कथितो वर्तते। निम्नवर्गीयैः जनैः ब्राह्मणादीनां निन्दायां क्षत्रियादीनां क्रमेण शतम्, द्विशतम्, चतुःशतम् पाणानां दण्डस्य विधानं वर्तते।

**स्तेयः सहासश्च –** मनोरनुसारं स्तेयः साहसश्च अपराधद्वयमपि पृथक् पृथगस्ति। वस्तुस्वामिनः अनुपस्थितौ गुप्तरूपेण चौरीकरणं स्तेयः कथ्यते तथा वस्तुस्वामिनः उपस्तिथौ तस्माद् बलपूर्वकं धनादीनामपहरणं साहसं कथ्यते। यथोक्तं मनुना –

**स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम्।**
**निरन्वयं भवेत्स्तेयं हृत्वाऽपव्ययते च यत्।।**[15]

मनुः कथयति यत् चौरस्य गुणदोषान् ज्ञात्वा अपि यदि कश्चन चौरकार्यं करोति चेत् तत्र तत् चौरकार्यं भिन्नभिन्नवर्णेषु भिन्नं भिन्नं पापफलं सम्पादयति। यदि कश्चन शूद्रः चौरकर्म करोति चेत् सः चौरकार्यस्य अष्टगुणकपरिमितं पापफलं प्राप्नोति, वैश्यः षोडशगुणकम्, क्षत्रियः द्वात्रिंशद्गुणकम्, ब्राह्मणश्च चतुःषष्टिगुणकं, शतगुणकं, अष्टाविंशत्युत्तरशतगुणकं वा पापफलं प्राप्नोति। अस्य कारणमेतदस्ति यत् अन्यवर्णानामपेक्षया ब्राह्मणवर्णः धर्माधर्मविवेके दक्षो भवति, अतः तस्य अपराधस्य फलमपि अन्यापेक्षया अधिकं भवति।

**दण्डस्य उद्देश्यम्**

भारतीयसमाजे प्राचीनकालादेव दण्डस्य चत्वारि स्वरूपाणि आसन् –

**१. अवरोधकः**

**२. निरोधकः**

**३. सुधारात्मकः**

**४. प्रतिकारात्मकः**

**अवरोधकः**

भविष्ये अपराधो न भवेदिति धिया मनुष्याणां मनसि भयस्य स्थापनमवरोधकः कथ्यते। यथोक्तं मनुना –

**सर्वो दण्डजितो लोको दुर्लभः हि शुचिर्नरः।**
**दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते।।**[16]

सर्वे मनुष्याः दण्डजिताः अर्थात् दण्डभिया सन्मार्गमनुसरन्ति, प्रकृत्यैव शुद्धमनस्काः तु अत्यन्तं दुर्लभा एव। दण्डभयेनैव जगति सर्वे स्व-स्वोपभोगेषु समर्थाः भवन्ति।

राज्ञः एतत्कर्त्तव्यमस्ति यत् राजा अपराधिनां दण्डविधानेन समाजं भयमुक्तं कुर्यात्, येन अपराधिनः पुनः आपराधिककर्मणि प्रवृत्ताः न भवेयुरिति। अतः प्राचीनकालादेव अपराधिनां दण्डप्रदानेन अन्येषु सामान्यजनेषु अपराधकर्मणः निवृत्तये व्यवस्था आसीत्, येन दण्डभयेन कोऽपि आपराधिककार्यं न करोति। उक्तञ्च मनुना –

**बन्धनानि च सर्वाणि राजा मार्गे निवेशयत्।**
**दुःखिता यत्र दृश्येरन्विकृताः पापकारिणः।।**[17]

**निरोधकः**

अपराधो वारं वारं न भवेदिति धिया दण्डादिना तस्य निराकरणं निरोधकः कथ्यते। अस्य मुख्योद्देश्यमापराधिककर्मणां न्यूनीकरणमस्ति। अत्र अपराधिनां अङ्गच्छेदनम्, देशनिष्कासनम्, कठोर-कारागारविधानम् इत्यादिमाध्यमेन दण्डः दीयते येन अपराधिनः पुनः अनुचितकार्यं कर्तुं शारीरिकरूपेण समर्था एव न भवन्ति। अथवा अपराधिनां मनसि तावत् भयस्थापनं क्रियते येन भयकारणेन ते पुनः अपराधं न कुर्वन्ति।

**सुधारात्मकः**

अपराधकर्तॄणां न केवलं दमनमपितु तेषां नैतिकरूपेण चारित्रिकरूपेण च शुचितासम्पादनं सुधारात्मकोद्देश्यं कथ्यते। अत्र अपराधस्यापेक्षया अपराधकर्तृषु विशेषतया विचारः क्रियते, येन तेषां अपराधप्रवृत्तीनां परिवर्तनं कृत्वा समाजे सुयोग्यत्वं सम्पादनीयं स्यात्।

अतः अस्य मुख्यमुद्देश्यम् अधर्माचरणे प्रवृत्तानां मनुष्याणाम् उपदेशादिमाध्यमेन तेषां नैतिकोन्नतिः, बुद्धिपरिष्करणम् इत्यादिना सत्कर्मणि प्रवर्तनम् इत्यस्ति।

**प्रतिकारात्मकः**

अपराधपीडितानां मनसि प्रतिशोधस्य भावनायाः जागरणात् अपराधिनं प्रति प्रतिकारः प्रतिकारात्मकोद्देश्यं कथ्यते। प्राचीनकाले यदा दण्डविधानस्य समुचिता व्यवस्था नासीत् तदा अपराधे सति अपराधकर्तुः पीडितस्य च मध्ये वादप्रतिवादं भवति स्म। बहुत्र स्थाने च सामाजिकरूपेणापि अपराधस्य प्रतिकारं क्रियते स्म। अस्य मुख्योद्देश्यं पीडितव्यक्तीनां प्रतिवादभावनया आपराधिककर्मणां न्यूनीकरणमस्ति।

**वर्तमानभारतीयदण्डप्रक्रियायाः मुख्यः सिद्धान्तः**

मानवसभ्यतायाः विकासेन सह अपराधानां दण्डानाञ्च सङ्कल्पनापि परिवर्तते। प्राचीनकालादेव दण्डस्योद्देश्यं न केवलमपराधिनां यातनादिप्रदानम् अपितु दण्डस्योद्देश्यं समाजस्य सुरक्षा, अपराधानां निवारणम्, अपराधिनाञ्च व्यवहारे सकारात्मकपरिवर्तनमपि आसीत्। वर्तमानभारतीयदण्डविधाने सामान्यतया चतुर्णां मुख्यसिद्धान्ताना-मुल्लेखः प्राप्यते –

**१. निवारकसिद्धान्तः**

अस्य सिद्धान्तस्य उद्देश्यं अपराधिनां अन्यमनुष्याणाञ्च मनसि भयस्थापनेन आपराधिककर्मणां निवारणमस्ति। अत्र दण्डस्य उदाहरणानि प्रस्तूय जनानां मनसि भयस्य वातावरणं सृज्यते, येन ते आपराधिककार्ये प्रवृत्ताः न भवेयुरिति। अयं सिद्धान्तः विशेषतया प्राचीनकाले मध्यकाले च तदानीं प्रचलित आसीत् यदा मृत्युदण्डः, अङ्गविच्छेदनम्, क्रोडप्रहारः इत्यादिः अत्यन्तं कठोरदण्डः दीयते स्म। परन्तु अयं विधिः अपराधस्य न्यूनीकरणाय निवारणाय वा स्थायि समाधानं न भवति।

**२. प्रतिशोधात्मकसिद्धान्तः**

अस्योद्देश्यम् अपराधिनः तावदेव दण्डविधानं स्यात् यावत् तेन अपराधः कृतः। प्राचीनकाले न्यायस्य इयमेव सङ्कल्पना मुख्यासीत्। अपराधिनं प्रति प्रतिशोधभावनया तेन कृतापराधस्य प्रतिकार एव न्यायः इति मन्यते स्म। परन्तु अनेन सिद्धान्तेन समाजस्य उन्नयनापेक्षया जनानां मनसि प्रतिशोधस्य हिंसायाः च भावना

विकसति, येन समाजस्य समुन्नत्यै बाधा जायते। किञ्च अद्यापि अयं सिद्धान्तः समाजे प्रवर्तितो वर्तते।

### ३. निवारकसिद्धान्तः

अस्य सिद्धान्तस्य उद्देश्यं अपराधिनां समाजात् बहिष्करणमस्ति, येन अपराधिनः वारं वारं तादृशकर्मसु प्रवृताः न भवेयुः। अत्र अपराधिनां कारावासः, अधिकारस्य न्यूनीकरणम्, दण्डविधानेन पुनः आपराधिककर्मकरणाय अक्षमताकरणम् इत्यादि अस्य सिद्धान्तस्य प्रमुखानि उदाहरणानि सन्ति।

### भारतीयन्यायसंहितायां (BNS) वर्णिताः अपराधाः तेषां कृते दण्डाश्च

| अनुच्छेदेषु वर्णिताः अपराधाः | दण्डाः |
|---|---|
| अनुच्छेदः ११२, संगठितः अपराधः | १ वर्षतः ७ वर्ष यावत् कारावासः |
| अनुच्छेदः ११३, आतङ्कवादः | न्यूनतमः कारवासः, अधिकतमः मृत्युदण्डः |
| अनुच्छेदः १०४, हत्या | आजीवनं कारावासः मृत्युदण्डो वा |
| अनुच्छेदः ३३६ (३), छलप्रयोजनाय कूटरचना | ७ वर्ष यावत् कारावासः |
| अनुच्छेदः ३०९ (५), परधनादीनामपहारणप्रयासः | ७ वर्ष यावत् कठोरः कारावासः |

### मनुस्मृतौ वर्णिताः केचन अपराधाः तेषां कृते दण्डाश्च

१. यस्मिन् अपराधे सामान्यप्राजानां कृते एकपणपरिमितं दण्डस्य विधानमस्ति तस्मिन् अपराधकर्मणि युक्ते सति राज्ञः कृते सहस्रपरिमितं दण्डस्य विधानं भवति[18]।

२. यदि शूद्रः, वैश्यः, क्षत्रियः चौरकार्यं करोति चेत् तस्य कृते क्रमेण अष्ट-षोडश-द्वाविंशतिगुणकपरिमितं दण्डस्य विधानं वर्तते[19]।

३. यदि कश्चन ब्राह्मणः चौरकार्ये संलिप्तो वर्तते चेत्तस्य कृते चतुःषष्टिगुणकपरिमितं दण्डस्य विधानं वर्तते[20]।

४. ब्राह्मणाय कृते यदि क्षत्रियः, वैश्यः, शूद्रः अपशब्दं कठोरवचनं वा वदति चेत् तदा क्षत्रियादीनां क्रमेण शतपणाः, सार्धशतपणाः, ताडनम् इति दण्डस्य विधानं वर्तते[21]।

५. यदि कश्चन ब्राह्मणः क्षत्रियवैश्यशूद्राणां कृते अपशब्दं कठोरवचनं वा वदति तदा तादृशब्राह्मणस्य कृते क्रमेण पञ्चाशत्-पञ्चविंशति-द्वादशपणपरिमितम् आर्थिकदण्डस्य विधानं वर्तते[22]।

### उपसंहारः

महाभारतस्यानुसारेण प्रमादादिभ्यो मनुष्यान् रक्षितुम्, धनादीनां संरक्षणाय च यो नियमविशेष आचार्यैः स्थापितः सः दण्डशब्देनाभिधीयते। दण्डः न केवलं वस्तूनां रक्षैव करोति किञ्च समाजे मनुष्याणां मर्यादापथि अभिप्रेरयति स्थापयति च। तदेवोक्तं मनुना यत् दण्ड एव प्रजासु शासनं करोति, दण्ड एव सर्वान् रक्षति, सर्वेषु सुप्तेषु च दण्ड एव जागर्ति अतः विद्वांसः दण्डमेव धर्मं कथयन्ततीति।अर्थात् दण्डः धर्मस्य पर्याय इत्यपि वक्तुं शक्यते। पृथक् पृथक् अपराधानां कृते अस्माकं धर्मग्रन्थेषु पृथक् पृथक् दण्डस्य विधानं वर्तते। यथा प्रथमे द्वितीये वा अपराधे सति वाग्दण्डस्य धिग्दण्डस्य वा विधानं मनुना प्रतिपादितम्। ततोऽपि अपराधे सति अर्थदण्डस्य विधानमस्ति। ततः परञ्च मृत्युदण्डः प्रदीयते। वर्तमानसमये भारतीयदण्डसंहितानुसारेण अपराधानां प्रकृत्यनुसारं विविधानां दण्डानां व्यवस्था वर्तते। दण्डव्यवस्था समाजस्य राष्ट्रस्य वा सुव्यवस्थितसञ्चालनाय नितान्तमपेक्ष्यते।

### सन्दर्भग्रन्थसूची


| ग्रन्थः | लेखकः/सम्पादकः/प्रकाशकः |
|---|---|
| 1. मनुस्मृतिः | मनुः, गीताप्रेसगोरखपुरम् |
| 2. संस्कृत व्याकरण शास्त्र का इतिहास | युधिष्ठिरमीमांसकः, चौखम्बापब्लिशर्स |
| 3. निरुक्तम् | यास्कः, चौखम्बाविद्याभवनम् |
| 4. व्याकरणमहाभाष्यम् | पतञ्जलिः, मोतीलालबनारसीदास |
| 5. काशिका | वामनजयादित्यौ, चौखम्बासुरभारतीप्रकाशनम् |
| 6. महाभारतम् | वेदव्यासः, गीताप्रेसगोरखपुरम् |


### पादटिप्पण्यः-

[1] निरुक्तम् २/२/११
[2] "अमन्ताड्ड:" १/११३
[3] म.भा.शा.प. १५/१०
[4] म.भा.शा.प. १५/८
[5] महाभाष्यम् १/१/१
[6] काशिका ५/४/२
[7] तत्रैव न्यासे
[8] मनुस्मृतिः ७/१८
[9] मनुस्मृतिः ८/१२९
[10] मनुस्मृतिः ८/१२५
[11] मनुस्मृतिः ८/१३८
[12] मनुस्मृतिः ९/२३२
[13] मनुस्मृतिः ९/२७६
[14] मनुस्मृतिः ९/२८०
[15] मनुस्मृतिः ८/३३२
[16] मनुस्मृतिः ७/२२
[17] मनुस्मृतिः ९/२८८
[18] मनुस्मृतिः ८/३३६
[19] मनुस्मृतिः ८/३३७
[20] मनुस्मृतिः ८/३३८
[21] मनुस्मृतिः ८/२६७
[22] मनुस्मृतिः ८/२६८